CS (Main) Exam,2021

**HXS–C–SNKT**

# संस्कृतम्

( अनिवार्यम् )

| समयः होरात्रयम् (घण्टा-त्रयम्) | पूर्णाङ्काः 300 |
|---|---|

**प्रश्नपत्रविषये विशेषनिर्देशाः**

**प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः**

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। रेखाचिह्नेन नैव निरस्ते सति अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

# SANSKRIT

**( Compulsory )**

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

**1.** निम्नलिखितेषु विषयेषु **कमप्येकं** विषयमवलम्ब्य षट्शत-शब्दैः (*600* परिमितशब्दैः) निबन्धो लेखनीयः — 100

(*a*) शिशुषु कुपोषणसमस्या

(*b*) वैश्विकशान्त्यै समाह्वयाः

(*c*) मातृभाषा प्राथमिकी शिक्षा च

(*d*) भाटकितकुक्षेः सामाजिकी स्वीकृतिः

**2.** अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारम् अधःप्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया समासतश्च शुद्धगिरा दीयताम्— 12×5=60

पुराकालिके भारते राजतंत्रस्य इयान् प्रभाव आसीद् यद्राजा राज्यस्यात्मा प्रोक्तः। प्राचीन-धार्मिकग्रन्थान् अनुसृत्य राजा प्रजाभ्य ईश्वरस्य प्रतिनिधिर्वर्तते येन प्रजाः तत्साहाय्येन आत्मनः कष्टाकुलजीवनात् विमुक्तिं लभेरन्। राज्ञा विहीनस्य समाजस्य जीवनं कष्टपूर्णं भवति। पुराकालिकैर्भारतीयैः विद्वद्भी राज्ञो राज्यस्य वोत्पत्तिविषये काले काले नैके विचाराः प्रस्तुताः। ते हि विविधेषु सिद्धान्तेषु निर्धारिताः। तद्यथा—दैवीयसिद्धान्तः, शक्तिसिद्धान्तः, सुरक्षासिद्धान्तः, सामाजिकसंविदासिद्धान्तः इत्यादयः।

कौटिल्येन राज्यं मानवानां जीवनाय एका महत्त्वाधायिनी, अनिवार्या हितकारिणी च संस्था कल्पिता। तेन राज्ञः समुत्पत्तिः क्रमबद्धं नैव विवेचिता, परञ्च तदीये 'अर्थशास्त्रे' स्पष्टम् उल्लिखितं यद् यथा लघुमत्स्या दीर्घाकारकैर्मत्स्यैः भक्ष्यन्ते तथैव पुरा काले बलवन्तो बलहीनान् न्यपीडयन्। 'मात्स्य-न्याय' नाम्ना अनेन अन्यायेन जनाः पीडिता आसन्—अपरेषु शब्देषु पशुराज्यं प्रावर्तत। प्रपीडिताभिः प्रजाभिः संभूय कश्चन सामर्थ्यसंयुतो जनः स्वीयो राजा नियुक्तः। ताभी राज्ञे कृष्युत्पादस्य षष्ठांशं, व्यापारिकायस्य च दशमांशं समर्पयितुं विनिर्णीतम्। प्रत्युत्तरे राजा प्रजानां हितं पुष्णातुं दायित्वम् उररीकृतवान्। राज्ञा प्रवर्तितान् नियमान् ये नैव स्वचकुर्वन् ते तेन दण्डिता अभवन्। राजा इन्द्रइव प्रजानां रक्षकः, अथ च, यम इव कृपालुः कल्पितः। कौटिल्यानुसारेण राजाज्ञानां विरोधोऽथवा तदीयापमानः प्रतिबन्धितो वर्तते।

यस्मिन् समाजे राज्ञा प्रजाभ्यो रक्षणं प्रदीयते तत्र जना निर्भयं गृहद्वाराणि समुद्घाट्य विचरन्ति। यदा राजा रक्षणपरस्तदा स्त्रिय एकाकिन्योऽपि आभूषणानि सन्धार्य मार्गे विचरितुं प्रभवन्ति। राज्ञा रक्षिते समाजे मानवतायाः साम्राज्यं राजते। ईदृशे राज्ये सर्वविधा समुन्नतिर्भवति। अपरैः पुराकालिकैर्ग्रन्थैः साकं कौटिल्यस्य 'अर्थशास्त्रे'ऽपि एतत्सत्यं प्रतिपादितम्। पुरा राजपदम् अस्थिरं राजशक्तयश्च नियता आसन्। परन्तूत्तरवैदिकयुगे राज्यानाम् आकारो यथा यथा वृद्धिं गतस्तथा तथा राज्ञाम् अधिकारे चैश्वर्ये वृद्धिरधिगता। प्रजानां रक्षापेक्षया राज्ञो रक्षायै अधिकमवधानं प्रारभत। राजपदस्य प्रतिष्ठानुगुणं राज्ञो वैभवः, विलासः, प्रदर्शनं च व्यवर्धन्त। शुक्रनीतौ तथ्यमिदं विस्तरेण वर्णितम्।

(*a*) राज्ञो विषयेऽथ च राज्यस्य विषये किमस्ति पुराकालिकम् अवधारणम्?

(*b*) 'मात्स्य-न्यायः' कथमन्यायः प्रोच्यते?

(*c*) राज्ञः प्रजानाञ्च पारस्परिकसम्बन्धानां क आधारो वर्तते?

(*d*) 'मानवतायाः साम्राज्यम्' इत्यस्य कोऽभिप्रायः?

(*e*) उत्तरवैदिकयुगे प्रजानां स्थितौ किं परिवर्तितम्?

**3.** अधोवर्त्तिगद्यांशस्य संक्षेपो मूलभागस्य तृतीयांशपरिमितः स्वशब्दैरेव लेख्यः। शीर्षको न प्रदेयः — 60

राजाराममोहनरायस्य कार्यकलापानां विरोधिनो भारतीयव्यापारिणः ब्राह्मसमाजस्य प्रभावं प्रणाशयितुं 1830तमे ख्रीष्टीयाब्दे 'धर्म समाज' नाम्नीं संस्थां संस्थापितवन्तः। अत्रान्तरे हेनरी डेरोजियो आधुनिकविचाराणां प्रसारार्थं 'हिन्दू कॉलेज' नाम्नि महाविद्यालये एकम् अकाडेमिक एसोसिएशनं स्थापयामास। एतत्संघटनं पारम्परिकरूढीनाम् अन्धविश्वासानां च खण्डने एतादृशेभ्यः इतरसंघटनेभ्यो दृढतरम् आसीत्। अस्मादेव संघटनाद् 'यंग बंगाल'-संघटनम् अजायत। हिन्दू कॉलेज-कर्मकरैः पीडनात् संघटनमेतद् यदा विघटितं तदाऽस्य भूतपूर्वसदस्याः ब्राह्मसमाजे सम्मिलिता जाताः। राममोहनरायस्य मृत्योरनन्तरम् अस्य समाजस्य नेतृत्वं बंगालस्यैकस्य प्रमुखव्यापारिणः द्वारकानाथठाकुरस्य हस्ते गतम्। एकोनविंश-शताब्दस्य चतुर्थे चाथ पञ्चमे दशाब्देषु बंगालप्रान्ते ज्ञानप्रसाराय समर्पिता ईदृश्यः सामाजिकसंस्था एकैकश आविर्भूताः। अन्ततः 1851तमे ख्रीष्टीयाब्दे 'ब्रिटिश इंडियन एसोसिएशन' नामैकं राष्ट्रिय-राजनीतिक-संघटनं संस्थापितम्।

एवंविधा घटनाः बंबई-प्रान्तेऽपि दृक्पथमायाताः। देशस्य एतस्मिन् दिग्विभागे ईदृशानाम् आन्दोलनानां नेतृत्वं समृद्धैः सम्मानितैश्च पारसीकजनैः विहितम्। एते पारसीका औपनिवेशिकशासनस्य समर्थनं कृतवन्तः। ते हि उदीयमाना युवानो महाराष्ट्रिया बुद्धिजीविन आसन् ये खलु यूरोपीयपद्धत्या संचालितेन एलफिन्स्टन कॉलेज इति महाविद्यालयेन सम्बद्धा अवर्तन्त। एषु बुद्धिजीविषु प्रमुख आसीत् बालशास्त्री जाम्बेकरः, येन 'बम्बई मिरर' नाम आंग्ल-मराठी-साप्ताहिक-पत्रं समारब्धम्। एतत्पत्रं स्वीयराष्ट्रस्य प्रशासने भारतीयेभ्यः सहभागं प्रदातुम् आंग्लान् सम्बोधयति स्म अथ च औपनिवेशिककरान् शुल्कनीतीश्च कढ्वालोचयति स्म। अपरो बुद्धिजीवी अवर्तत रामकृष्णो विश्वनाथः, येन मराठीभाषायां भारतीयेतिहासविषयकम् एकं पुस्तकं प्रकाशितम्; यस्मिन् तेन भारते ब्रिटेनदेशीया नीतिरालोचिता; यद्यपि तदीयो विश्वास आसीद् यत्सर्वं यथोचितम् आपादयितुं शक्यते यदि नाम प्रबुद्धांग्लानां भारतीयानां च मध्ये नेदीयान् सम्पर्कः स्यात्। गोपालः हरिदेशमुखो महाराष्ट्रस्य अन्यतमो बुद्धिजीवी अविद्यत, यः खलु पूना-नगरात् प्रकाशिते 'प्रभाकर' नाम्नि पत्रे स्वीयलेखान् अलिखत्। तेन भारतीयस्वातन्त्र्यापहरणस्य कारणं विवेचितम्। तस्य मतेन भारतस्य स्वातन्त्र्यापहारस्य प्रमुखं हेतुद्वयमासीत्—सामन्तवादस्य प्रथा, अथ च, भारतस्य अभिजातवर्गस्य सामान्यजनानाञ्च मध्ये विद्यमानः खातः।

1852तमे ख्रीष्टीयाब्दे स्थापितस्य 'बम्बई एसोसिएशन'-संघटनस्य सदस्येषु ऐक्यं तदा विखण्डितं यदा युवच्छात्रैः सर्वेभ्यो भारतीयेभ्य आंग्लेभ्य इवाधिकाराः समभ्यर्थिताः; परिणामतश्च मृदुप्रकृतिका उच्चवर्गीया व्यापारिणोऽस्मात् संघटनात् पृथग्भूताः। केवलं 'मद्रास एसोसिएशन' इति संघटनेन भारतीयकृषकाणां भू-स्वामिभिः विधीयमानं शोषणं समापयितुं प्रश्नः समुत्थापितः। तस्मिन्काले ईस्ट इंडिया कंपनी इत्यस्य नियमावल्याः पुनरीक्षणं विधेयमासीत्; अतश्च त्रिभिरेव संघटनैः भारते औपनिवेशिक-शासनस्य अन्यायान् विरुध्य लन्दननगरे संसदे याचिकाः प्रेषिताः।

**4.** अधोलिखितगद्यांशस्य आंग्लभाषया अनुवादः करणीयः — 20

प्रत्येकं देशस्य इतिहासः तदीयभूगोलेन प्रभावितो भवति। यावत्पर्यन्तं भारतं सम्बद्धम्, अदसीया सभ्यता युग-युगान्तरेभ्यः स्वतन्त्ररूपेण प्रगतिपथम् आरूढा। भारतम् उत्तरीयपर्वतानां दक्षिणीयसमुद्राणाञ्च भयावहबाधाभिः प्रायेण शेषजगतः अपाकृतमतिष्ठत्। परिणामतस्तस्मिन् वैदेशिकः प्रभावो नाधिकः अवर्तत। 1600 मील-परिमितः सुदीर्घः 50 मील-परिमित आयतश्च हिमालयपर्वतः पश्चिमदिशातः पूर्वस्यां दिशि प्रसृतं भित्ति-स्वरूपमस्ति। पूर्वस्यां पत्कोई-नागा-लुशाई-पर्वताः तदीयारण्यानि गहनानि च गमनागमनेषु विघ्नमुत्पादयन्ति। पश्चिमदिशि नूनमेव केचन पर्वतीयाध्वानः सन्ति, तथा हि खैबर-बोलन-पर्वतीयाध्वानौ, यन्मार्गेण वैदेशिका आयान्ति स्म।

दक्षिणदिग्विभागे सागराः शताब्देभ्यो भारते गमनागमनं बाधितवन्तः। परश्चानन्तरं नौविद्या-क्षेत्रे महती प्रगतिरर्जिता। परिणामतः सागरः खलु समुद्र-व्यापारार्थं सुगमो मार्गः सिद्धः। 1498तमे खीष्टीयाब्दे वास्को-डी-गामा इत्यस्य नेतृत्वे पुर्तगालदेशस्य वासिनः सर्वप्रथमं समुद्रमार्गाद् भारतं समाययुः। अनन्तरम्, हॉलैंड-फ्रांस-ब्रिटेनदेशीयाः समागताः। भारते स्वीयं प्रभुत्वं संस्थापयितुम् एते हि बहु कालेभ्यः मिथः संघर्षं कृतवन्तः। एवङ्खलु भारतस्य भौगोलिकपार्थक्यकारणाद् अदसीया सभ्यता वैदेशिकैः प्रभावैः नाधिकं संस्पृष्टा।

**5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः — 20

At the stroke of the midnight hour, when the world sleeps, India will awake to life and freedom. A moment comes when we step out from the old to the new. It is fitting that at this solemn moment we take the pledge of dedication to the service of India. The service of India means the service of the millions who suffer. It means the ending of poverty and ignorance. It means the ending of disease and inequality of opportunity. The ambition of the greatest man of our generation has been to wipe every tear from every eye. That may be beyond us, but as long as there are tears and suffering, so long our work will not be over. This is no time for petty and destructive criticism, no time for ill-will or blaming others. We have to build the noble mansion of free India where all her children may dwell.

It is a fateful moment for us in India, for all Asia and for the world. A new star rises, the star of freedom in the East, a new hope comes into being. May the star never set and that hope never be betrayed !

**6.** *(a)* अधोलिखितानां स्वरचितवाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* अधोऽधः

*(ii)* उभयतः

*(iii)* साकम्

*(iv)* अनु

*(v)* इदानीम्

(b) पदसाधनं क्रियताम्— 1×10=10

(i) तद् (पुंलिङ्गे) + तृतीया, बहुवचनम्

(ii) नदी + चतुर्थी, एकवचनम्

(iii) हरि + षष्ठी, द्विवचनम्

(iv) राजन् + पञ्चमी, एकवचनम्

(v) वधू + प्रथमा, बहुवचनम्

(vi) अस् + लङ्, मध्यमपुरुषे बहुवचनम्

(vii) वद् + लट्, प्रथमपुरुषे द्विवचनम्

(viii) स्था + विधिलिङ्, प्रथमपुरुषे एकवचनम्

(ix) जि + लृट्, उत्तमपुरुषे एकवचनम्

(x) नम् + लोट्, प्रथमपुरुषे बहुवचनम्

(c) समासो विधेयः समासनाम च लेखनीयम्— 2×5=10

(i) जनानाम् अभावः

(ii) शास्त्रे निपुणः

(iii) कुत्सितः पुत्रः

(iv) कण्ठे कालः

(v) राज्ञः पुरुषः

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) तं बालकं दुग्धं देहि।

(ii) भूपत्युः सह अगच्छत्।

(iii) त्वं पुष्पाणि पश्यतु।

(iv) आसने अतिथिः अधितिष्ठति।

(v) धनेन ज्ञानम् गुरुतरम्।

★★★